208

Bill No. 5/07-08
1834
2008-0643

तर्क संग्रह of अन्नम्भट्ट with the
वाक्यवृत्ति of मेरु शास्त्री - Ed. by
भवानी शंकर शर्मा सुकठणकर.
मुम्बई, 1910

श्रीः

श्रीमदन्नंभट्टविरचितः

# तर्कसंग्रहः ।

श्रीमेरुशास्त्रिकृतवाक्यवृत्तिसहितः।

सुकठणकरोपाव्हन्यायशास्त्रिभवानी
शंकरशर्म्मणा संशोधितः

अयं च

पण्डित-ज्येष्ठराम मुकुंदजी शर्मसूनुना
विठ्ठलप्रसादज्येष्ठारामशर्मणा
मुम्बय्याम्

'नेटिव ओपिनियन' मुद्रणालये मुद्रापितः

शके १८३२ इ० स० १९१०

Indira Gandhi National
Centre for the Arts

श्रीः

श्रीमदन्नंभट्टविरचितः

# तर्कसंग्रहः ।

श्रीमेरुशास्त्रिकृत वाक्यवृत्तिसहितः ।

सुकठणकरोपाव्ह न्यायशास्त्रि भवानीशंकरशर्म्मणा

संशोधितः

अयं च

पण्डित–ज्येष्ठाराम मुकुंदजी शर्मसूनुना

विठ्ठलप्रसाद ज्येष्ठाराम शर्मणा-

मुम्बय्याम्

'नेटिव ओपिनियन्' मुद्रणालये मुद्रापितः

शके १८३१ ई. स. १९१०

Indira Gandhi National
Centre for the Arts

DATA ENTERED
Date 08/07/08

SANS
181.43
ANN

( सर्वेऽधिकारा मुद्रापकेण संरक्षिताः )

KALANIDHI
Rare Book Collection
IGNCA
ACC no: R-643
Date: 28.3.08

Indira Gandhi National
Centre for the Arts

# अनुक्रमणिका.

| विषयनाम निर्देशः | पृष्ठाङ्कः |
|---|---|
| अत्यन्ताभावः ( अभावः ) ... ... | ३९ |
| अधर्मः ( गुणः ) ... ... ... | ३७ |
| अनुपसंहारी ( सव्यभिचारः ) ... ... | २९ |
| अनुभवः ( बुद्धिः ) ... ... ... | १६ |
| अनुमानम् [ लिङ्गपरामर्शः ] ... ... | २१ |
| अनुमितिः ( अनुभवः ) ... ... ... | २१ |
| अन्योन्याभावः ( अभावः ) ... ... | ३९ |
| अन्वयव्यतिरेकी ( लिङ्गम् ) ... ... | २८ |
| अन्वयव्याप्तिः ... ... ... | २६ |
| अपक्षेपणम् ( कर्म ) ... ... ... | ३८ |
| अपरम् ( सामान्यम् ) ... ... ... | ३८ |
| अपरत्वम् ( गुणः ) ... ... ... | १३ |
| अप्रमा [ अयथार्थः ] ( अनुभवः ) ... ... | १७ |
| अभावः ( पदार्थः ) ... ... ... | ३९ |
| अयथार्थः [ अप्रमा ] ( अनुभवः ) ... ... | १७ |
| अयथार्था ( स्मृतिः ) ... ... ... | ३६ |
| अयुतसिद्धः ... ... ... ... | ३९ |
| अवयवः ... ... ... ... | २५ |
| असमवायिकारणम् ... ... ... | १८ |
| असाधारणः ( सव्यभिचारः ) ... ... | २९ |
| असिद्धः ( हेत्वाभासः ) ... ... ... | ३० |
| आकाङ्क्षा ... ... ... ... | ३३ |
| आकाशम ( द्रव्यम् ) ... ... ... | ७ |
| आकुंचनम् ( कर्म ) ... ... ... | ३८ |
| आत्मा ( द्रव्यम् ) ... ... ... | ८ |
| आपः ( द्रव्यम् ) ... ... ... | ५ |

Indira Gandhi National Centre for the Arts

विषयनाम निर्देशः पृष्ठाङ्कः

आप्तः ... ... ... ... ३२
आश्रयासिद्धः ( असिद्धः ) ... ... ... ३०
इच्छा ( गुणः ) ... ... ... ३६
इन्द्रियार्थ संनिकर्षः ... ... ... २०
उत्क्षेपणम् ( कर्म ) ... ... ... ३८
उदाहरणम् ( अवयवः ) ... ... ... २५
उपनयः ( अवयवः ) ... ... ... २५
उपमानम् ( प्रमाणम् ) ... ... ... ३२
उपमितिः ( अनुभवः ) ... ... ... ३२
उपाधिः ... ... ... ... ३०
करणम् ... ... ... ... १७
कर्म ( पदार्थः ) ... ... ... ... ३८
कारणम् ... ... ... ... १७
कार्यम् ... ... ... ... १८
कालः ( द्रव्यम् ) ... ... ... ७
केवलव्यतिरेकि ( लिङ्गम् ) ... ... ... २६
केवलान्वयि ( लिङ्गम् ) ... ... ... २६
गन्धः ( गुणः ) ... ... ... ... १०
गमनम् ( कर्म ) ... ... ... ३८
गुणः ( पदार्थः ) ... ... ... ... २
गुरुत्वम् ( गुणः ) ... ... ... १३
तर्कः ( अयथार्थानुभवः ) ... ... ... ३५
तेजस् ( द्रव्यम् ) ... ... ... ६
दिक् ( द्रव्यम् ) ... ... ... ... ७
दुःखम् ( गुणः ) ... ... ... ... ३६
द्रवत्वम् ( गुण ) ... ... ... ... १४
द्रव्याणि ... ... ... ... २
द्वेषः ( गुणः ) ... ... ... ... ३६
धर्मः ( गुणः ) ... ... ... ... ३७
निगमनम् ( अवयवः ) ... ... ... २६

Indira Gandhi National Centre for the Arts

| विषयः | पृष्ठांकः |
|---|---|
| निमित्तम् ( कारणम् ) ... ... ... | १८ |
| निर्विकल्पकम् ( प्रत्यक्षम् ) ... ... ... | १९ |
| पक्षः ... ... ... ... ... | २७ |
| पक्षधर्मता ... ... ... ... | २३ |
| पदम् ... ... ... ... ... | ३२ |
| पदार्थाः ... ... ... ... | १ |
| परम् ( सामान्यम् ) ... ... ... | ३८ |
| परत्वम् ( गुणः )... ... ... ... | १३ |
| परामर्शः ... ... ... ... | २२ |
| परार्थम् ( अनुमानम् ) ... ... ... | २४ |
| परिमाणम् ( गुणः ) ... ... ... | ११ |
| पृथक्त्वम् ( गुणः ) ... ... ... | १२ |
| पृथिवी ( द्रव्यम् ) ... ... ... | ३ |
| प्रतिज्ञा ( अवयवः ) ... ... ... | २५ |
| प्रत्यक्षम् ( प्रमाणम् ) ... ... ... | १९ |
| प्रध्वंसः ( अभावः ) ... ... ... | ३९ |
| प्रमा [ यथार्थः ] ( अनुभवः ) ... ... | १८ |
| प्रयत्नः ( गुणः ) ... ... ... | ३६ |
| प्रसारणम् ( कर्म ) ... ... ... | ३८ |
| प्रागभावः ( अभावः ) .... ... ... | ३९ |
| प्राणः ( वायुः ) ... ... ... | ६ |
| बाधितः ( हेत्वाभासः ) ... ... ... | ३१ |
| बुद्धिः ( गुणः ) ... ... ... | १५ |
| भावना ( संस्कारः ) ... ... ... | ९ |
| मनस् ( द्रव्यम् ) ... ... ... | ९ |
| यथार्थः [ प्रमा ] ( अनुभवः ) ... ... | १६ |
| यथार्था ( स्मृतिः ) ... ... ... | ३६ |
| योग्यता ... ... ... ... | ३३ |
| रसः ( गुणः ) ... ... ... ... | १० |
| रूपम् ( गुणः ) ... ... ... ... | ९ |


Indira Gandhi National Centre for the Arts

| विषयः | पृष्ठाङ्कः |
|---|---|
| लिङ्गम् ( हेतुः ) ... ... ... | २६ |
| लिङ्गपरामर्शः ( अनुमानम् ) ... ... | २५ |
| वाक्यम् .. ... ... ... | ३४ |
| वायुः ( द्रव्यम् ) ... ... ... | ६ |
| विपक्षः ... ... ... ... | २७ |
| विपर्ययः ( अयथार्थानुभवः ) ... ... | ३५ |
| विभागः ( गुणः ) ... ... ... | १२ |
| विरुद्धः ( हेत्वाभासः ) ... ... ... | २९ |
| विशेषः ( पदार्थः ) ... ... ... | ३८ |
| वेगः ( संस्कारः ) ... ... .... | ३७ |
| व्यतिरेकव्याप्तिः ... ... ... | २६ |
| व्याप्तिः ... ... ... ... | २२ |
| व्याप्तत्वासिद्धः ( असिद्धः ) ... ... | ३० |
| शक्तिः ... ... ... ... | ३३ |
| शब्दः ( गुणः ) ... ... ... | १५ |
| शाब्दज्ञानम् ... ... ... ... | ३४ |
| संख्या ( गुणः ) ... ... ... | ११ |
| सत्प्रतिपक्षः [हे त्वाभासः]... ... ... | २९ |
| समवायः ( पदार्थः ) ... ... ... | ३९ |
| संनिधिः ... ... ... ... | ३३ |
| सपक्षः ... ... ... ... | ४७ |
| समवायि ( कारणम् ) ... ... ... | १८ |
| सविकल्पकम् ( प्रत्यक्षम् ) ... ... | १९ |
| सव्यभिचारः ( हेत्वाभासः ) ... ... | २८ |
| संयोगः ( गुणः )... ... ... ... | ३७ |
| संशय ( अयथार्थानुभवः ) ... ... ... | ३५ |
| संस्कारः ( गुणः ) ... ... ... | ३७ |
| साधनाव्यापकः ... ... ... | ३० |
| साधारणः ( सव्यभिचारः ) ... ... | २९ |
| साध्यव्यापकः ... ... ... ... | ३० |

Indira Gandhi National
Centre for the Arts

| विषयः | | | | पृष्ठांकः |
|---|---|---|---|---|
| सामान्यम् ( पदार्थः ) | ... | ... | ... | २–३८ |
| सुखम् ( गुणः ) | ... | ... | ... | ३६ |
| स्थितिव्यापकः ( संस्कारः ) | | ... | ... | ३७ |
| स्नेहः ( गुणः ) | ... | ... | ... | १४ |
| स्पर्शः ( गुणः ) | ... | ... | ... | १० |
| स्मृतिः ( बुद्धिः ) | ... | ... | ... | ३६ |
| स्वरूपासिद्धः ( असिद्धः ) | ... | ... | ... | ३० |
| स्वार्थम् ( अनुमानम् ) | ... | ... | ... | २४ |
| हेतुः ( अवयवः ) | ... | ... | ... | २५ |
| हेत्वाभासाः ... | ... | ... | ... | २८ |

Indira Gandhi National
Centre for the Arts

श्रीः

# तर्कसंग्रहः ।

## वाक्यवृत्तिसहितः ।

शिवया सहितं नत्वा शिवमम्बां गुरूनपि ॥
वाक्यवृत्तिं संग्रहस्य कुरुते बालसिद्धये ॥ १ ॥

ग्रन्थस्य निर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षायै निबध्नन् शिष्यप्रवृत्तये प्रयोजनाभिधेयौ च श्लोकेन आह—

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ॥**
**बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥ १ ॥**

निधायेति । हृदि मनसि निधानं स्वविषयकज्ञानजनकत्व सम्बन्धेन स्थापनम् । मनसा विश्वेशं ध्यात्वेतिभावः । बालानां ग्रहणपूर्वकधारणयोग्यानाम् । सुखेन अनायासेन । तर्कसंग्रहः। तर्क्यन्ते प्रतिपाद्यन्ते ते तर्काः द्रव्यादिसप्तपदार्थाः तेषां संग्रहः लक्षणस्वरूपविभागप्रकारकज्ञानानुकूलः संक्षिप्तो व्यापारः । क्रियत इति । मयेति शेषः । तथाच मत्समवेतकृतिविषयस्तर्कसंग्रह इति वाक्यार्थः । अत्राभिधेयत्वरूपपदार्थसामान्यलक्षणं विभागवाक्यघटकीभूतपदार्थशब्दाद्बोध्यम् ।

वैशेषिकानुसारेण पदार्थान्विभजते—

**द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।**

द्रव्येति । न्यूनातिरिक्तसंख्याव्यवच्छेदाय सप्तपदम् । एवमग्रेऽपि । द्रव्यसामान्यलक्षणं तु गुणवत्त्वं बोध्यम् ।

Indira Gandhi National
Centre for the Arts

द्रव्याणि विभजते.

तत्र द्रव्याणि । पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ॥

पृथिवीति ।

गुणान्विभजते ।

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग परत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेष प्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः ॥

रूपेति । द्रव्यसामान्यवृत्तित्वं गुणसामान्यलक्षणम् । तच्च द्रव्येतरवृत्तितानवच्छेदकद्रव्यसामान्यवृत्तितावच्छेदकपदार्थविभाजकोपाधिमत्त्वम् । कर्मादिसामान्यलक्षणं त्वग्रे दर्शयिष्यते ।

कर्माणि विभजते

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि ।

उत्क्षेपणेति ।

सामान्यं विभजते ।

परमपरं चेति द्विविधं सामान्यम् ।

परमिति । अत्रेतिशब्दस्यस्वसमभिव्याहृतपदार्थतावच्छेदकपरत्वापरत्वरूपद्विप्रकारवत्सामान्यमिति वाक्यार्थः । परमपरंचेतिपदे तात्पर्यग्राहके ।

Indira Gandhi National Centre for the Arts

विशेषाणां विभागाभावात्तान्दर्शयति ।

**नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।**

नित्येति । नित्यद्रव्याणि पृथिव्यादिचतुर्णां परमाणवः । आकाशादिपञ्च । तेषामनन्तत्वाद्विशेषाणामनन्तत्वं बोध्यम् ।

समवायस्य विभागाभावं द्योतयितुं तस्यैकत्वमाह—

**समवायस्त्वेक एव ।**

समवाय इति । विभागो हि सामान्यधर्मस्य साक्षाद्व्यूनवृत्ति यावद्धर्मप्रकारकज्ञानानुकूलो व्यापारः । पृथिवीत्वादीनां साक्षाद्व्यूनवृत्तित्वाभावाद्द्रव्येत्यादेर्विभागत्वसिद्धिः । सामान्यधर्मस्य न्यूनवृत्तिश्च वैशेषिकाणां विभाजकोपाधिर्बोध्यः । तेन द्रव्यत्वादेर्भावत्वादिन्यूनवृत्तित्वेऽपि न क्षतिः । इत्थंच समवायत्वन्यूनवृत्तिधर्माभावान्न तद्विभाग इति ।

अभावसामान्यलक्षणं तु भावभिन्नत्वम् । तच्च अभावपदेनैव सिद्धमिति तान्विभजते ।

**अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति ।**

अभाव इति । चतस्रो विधा यस्येति व्युत्पत्त्या चतुःप्रकारवानभाव इत्यर्थः । प्रागभाव इति । प्रागभावत्वादिरूपचतुःप्रकारवानिति समुदितोऽर्थः ।

द्रव्याणि क्रमेण निरूपयति ।

**गन्धवती पृथिवी । सा द्विविधा । नित्याऽनित्या च । नित्या परमाणुरूपा । अनित्या कार्यरूपा । पुनस्त्रिविधा । शरीरेन्द्रियविषयभेदात् ।**

Indira Gandhi National
Centre for the Arts

गन्धवतीति । अत्र पृथिवीत्वं जातिर्लक्ष्यतावच्छेदकम् । लक्षणं गन्धः । अत्र पाषाणादौ गन्धानुपलब्धिः क्वचिज्जलादौ तु तदुपलब्धि श्चानुत्कटत्वोत्कटत्वोपाधिभ्यामुपपादनीया । 'व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम् ।' तत्र व्यावृत्तिरितरभेदानुमितिः । इतरे जलादिचतुर्दश । तथाहि गन्धाभावे इतरत्वव्यापकत्वग्रहे सति गन्धवती पृथिवीति पक्षधर्मताग्रहे 'पृथिवीतरेभ्यो भिद्यते' इत्यनुमितिरुत्पद्यते । सैव व्यावृत्तिः । व्यवहारस्तु गन्धज्ञानेन पृथिवीत्वव्यञ्जने सति 'इयं पृथिवी' इति शब्दप्रयोगरूपः । लक्षणमुक्त्वा विभागमाह सेति । अत्र नित्याऽनित्या पृथिवी द्विविधेति वाक्यार्थः । तथा च 'उद्देश्यविधेयभावस्थले उद्देश्यतावच्छेदकसम्बन्धो विधेये भासते' इति नियमात् 'धनवान्सुखी' इति प्रत्ययवद्विधेयरूपद्विप्रकारयोरुद्देश्यतावच्छेदककोटिप्रविष्टनित्यानित्ययोरभेदो भासते इति नित्याऽनित्या पृथिवी नित्यत्वानित्यत्वाभिन्नद्विप्रकारवतीति लभ्यत इति । नित्यानित्येति । नित्यत्वं प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम् । अनित्यत्वं प्रागभाव प्रतियोगित्वध्वंसप्रतियोगित्वान्यतरवत्त्वं बोध्यम् । परमाणुरूपेति । स च 'जालसूर्यमरीचिस्थं यत्सूक्ष्मं दृश्यते रजः ॥ तस्य षष्ठस्तु यो भागः परमाणुः स उच्यते' इति वाक्यप्रसिद्धः । कार्येति । जन्येत्यर्थः । भेदपदार्थः स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मः । पञ्चम्यर्थः प्रयुक्तत्वं तस्य च धर्मत्रयसम्बन्धित्वे अन्वयः ।

**शरीरमस्मदादीनाम् । इंद्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।**

भोगायतनं शरीरम् । भोगश्च सुखदुःखान्यतरसाक्षात्कारः । आयतनमवच्छेदकतासम्बन्धेन आश्रयः । तथाच अवच्छेदकतया भोगाश्रयत्वं शरीरत्वम् । इन्द्रियत्वं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकरणमनःसंयोगाश्रयत्वम् । आत्मचर्मपुरीतन्मुखानां

Indira Gandhi National Centre for the Arts

व्यावृत्तये सत्यंतम् । अत एव आत्मभिन्नत्वेन सत्यन्तवैयर्थ्यशंका केषांचिदपास्ता । तथापि चर्मादावतिव्याप्तिः । श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति । उद्भूतत्वमनुद्भूतत्वाभावकूटम् । अनुद्भूतत्वानि शुक्लत्वादिव्याप्यानि नाना । अतएव संख्यादिकमादाय असम्भववारणायविशेषेति । विशेषगुणास्तु बुद्ध्यादयः षट्, रूपादिचतुष्टयं, स्नेहसांसिद्धिकद्रवत्वादृष्टभावनाशब्दा इति । कालादिवारणाय विशेष्यदलम् । अत एव ज्ञानकारणेति । कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया चक्षुःकालसंयोगस्यापि कारणत्वात्तदाश्रयकालादिवारणाय मन इति । विषयत्वं च शरीरेन्द्रियभिन्नत्वे सति भोगसाधनत्वम् । अतएव तस्य विभाजकत्वमप्युपपद्यते । अतएव च तेजोविषयेषु शरीरेन्द्रिययोरपरिकथनं भाष्यकाराणामपि सङ्गच्छते । भोगसाधनत्वं चादृष्टजन्यत्वात्साक्षात्परम्परया द्व्यणुकप्रभृतीनां सर्वेषामेव । 'यच्च कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात्परम्परया वा जनयति' इतिनियमात् । अस्मदादीनामिति । यद्यपि सर्वाणि शरीराणि पाञ्चभौतिकानि तथापि तत्र पार्थिवभागाः समवायिकारणमन्ये निमित्तकारणमिति तस्य पार्थिवत्वं बोध्यम् । इन्द्रियं गन्धग्राहकमिति । इदं च सावधारणम् । घ्राणस्य पार्थिवत्वे मानम् । तथाहि घ्राणं पार्थिवम् । रूपादिचतुष्टयाग्राहकत्वे सति गन्धग्राहकत्वात् । आत्मादौ व्यभिचारवारणाय सत्यन्तम् । स्वरूपासिद्धिवारणाय गन्धेतरसामान्याग्राहकत्वं विहाय रूपादिचतुष्टयेत्युक्तम् । एवं रसनेन्द्रियादावपि बोध्यम् ।

जलं निरूपयति--

**शीतस्पर्शवत्य आपः । ताश्च द्विविधाः । नित्या अनित्याश्चेति । नित्याः परमाणुरूपा अनित्याः कार्यरूपाः । पुनस्त्रिविधाः । शरीरेन्द्रियविषयभेदात । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिव्हाग्रवर्ति । विषयः सरित्समुद्रादिः ।**

Indira Gandhi National Centre for the Arts

शीतेति । क्वचिज्जले कदाचिच्छीतस्पर्शस्यानुपलब्धिः । क्वचिद्वाय्वादौ कदाचिच्छीतस्पर्शस्योपलब्धिश्चौपाधिकीति नाव्याप्त्यतिव्याप्ती । अन्यत्सर्वं पृथिव्या इव बोध्यम् ।

तेजो निरूपयति—

उष्णस्पर्शवत्तेजः । तच्च द्विविधं नित्यमनित्यंच-नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात । शरीरमादित्यलोके । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधः । भौमदिव्यौदर्याकरजभेदात । भौमं वन्ह्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ।

उष्णेति । चन्द्रकिरणादौ तूष्णस्पर्शः । पार्थिवादिस्पर्शेनाभिभूतो मण्यादिना वन्ह्यादाविव । तेन न तत्राव्याप्तिः ।

वायुं निरूपयति—

रूपरहितस्पर्शवान्वायुः । स द्विविधः । नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकंत्वक्सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तः सञ्चारी वायुः प्राणः । स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते ।

Indira Gandhi National
Centre for the Arts

रूपरहितेति । रूपाभावे सति स्पर्शवत्त्वं वायोर्लक्षणम् । पृथिव्यादित्रयवारणाय सत्यन्तम् । आकाशादिवारणाय विशेष्यदलम् । उपाधिभेदादिति । तेच हृदादिदेशाः ।

आकाशं लक्षयति—

शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यं च ।

शब्देति । शब्दस्य द्रव्यत्ववादिनं मीमांसकं पराभवयितुं गुणेति । नतु गुणवत्त्वं लक्षणघटकं प्रयोजनाभावात् । विभागाभावं द्योतयितुं तस्यैकत्वमाह । एकमिति । विभ्विति । विभुत्वं सर्वमूर्तद्रव्यसंयोगित्वम् । मूर्तानि पृथिव्यप्तेजोवायुमनांसि । मूर्तत्वं वेगवत्त्वम् ।

कालं लक्षयति—

अतीतादिव्यवहारहेतुः कालः । स एको विभुर्नित्यश्च ।

अतीतेति । व्यवहारश्च अतीतः कालः अनागतः काल इत्यादिवाक्यप्रयोगरूपः । तज्जनकत्वंच—वाक्यप्रयोगे ज्ञायमानवाक्यार्थस्य कारणत्वाद्वाक्यार्थघटकतया । तथाच तादृशव्यवहारजनकतावच्छेदकमुख्यविशेष्यत्वं कालत्वम् । मुख्यत्वनिवेशादतीतत्वादौ नातिव्याप्तिः । अतीतत्वं वर्तमानकालवृत्तिध्वंसप्रतियोगित्वम् । अनागतत्वं वर्तमानकालवृत्तिप्रागभावप्रतियोगित्वम् । वर्तमानत्वं प्रतियोग्यधिकरणत्वम् । माससंवत्सरादिव्यवहाराणामौपाधिकत्वादाह । एक इति ।

प्राच्यादिव्यवहारहेतुर्दिक् । सांचैका विभ्वी नित्या च ।

Indira Gandhi National Centre for the Arts

प्राच्यादीति। लक्षणं पूर्ववद्बोध्यम्। उदयाचलसंनिहितदेशावच्छिन्ना दिक् प्राची। अस्ताचलसन्निहितदेशावच्छिन्ना प्रतीची। मेरुसन्निहितदेशावच्छिन्नोदीची। मेरुव्यवहितदेशावच्छिन्ना दक्षिणा एवमन्या दिशो बोध्याः।

आत्मानं निरूपयति—

ज्ञानाधिकरणमात्मा। स द्विविधः। परमात्मा जीवात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव सुखदुःखादिरहितः। जीवः प्रतिशरीरं भिन्नः। विभुर्नित्यश्च।

ज्ञानेति। अधिकरणपदं समवायेन ज्ञानस्य लक्षणतालाभाय। ज्ञानमात्रं लक्षणम्। परमात्मेति। नित्यज्ञानामोघेच्छावान्स्वतंत्रो निर्दुःख ईश्वर इति। जगदुत्पत्तिस्थितिसंहारकर्तेत्यर्थः। एक इति। अद्वितीय इत्यर्थः। 'क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात्' इत्यनुमानेन लाघवादेक एव सिद्ध्यतीति भावः। प्रतिशरीरमिति अत्र भोगवत्त्वे सति अनवच्छिन्नभोगवद्भिन्नो भिन्नशब्दार्थः द्वितीयार्थोऽवच्छेद्यत्वं व्युत्पत्तिवैचित्र्याद्भोगेऽनवच्छेद्यत्वेचान्वेति। शरीरपदं तु प्रयोज्यतासम्बन्धेन तत्तन्मनोविशिष्टपरम्। तेनैकात्मनो जन्मभेदेनावस्थाभेदेन कायव्यूहस्थले च नानाशरीरसत्वेऽपि न क्षतिः एकस्यैव मनसः पूर्वपूर्वजन्मार्जितधर्माधर्मद्वारा सकलशरीरप्रयोजकत्वात्। तथाचैकैकात्मा यत्किञ्चिन्मनोविशिष्टशरीरावच्छिन्न भोगवद्भिन्न इति वाक्यार्थः। वीप्सावशात्तत्तन्मनोविशिष्टत्वेन सकलशरीराणां बोधः। विभुरिति परमाणुरूपत्वे तद्गतज्ञानादि प्रत्यक्षानुपपत्तेः। अपकृष्टपरिमाणत्वे सादित्वेन प्राथमिकप्रवृत्त्यनुपपत्तेः। अतएव नित्य इति।

Indira Gandhi National Centre for the Arts

मनो निरूपयति—

**सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च ॥**

सुखादीति । सुखादिशब्द आत्मसमवेतपरः । उपलब्धिसाधनत्वं च मानसत्वावच्छिन्नकार्यतानिरूपितकारणत्वम् । तेन सुखाद्युपनीतजनके कालविधया तज्जनके चक्षुरादौ नातिव्याप्तिः । तथा च मानसत्वावच्छिन्नकार्यतानिरूपितकारणत्वे सतीन्द्रियत्वं लक्षणम् । सन्निकर्षवारणाय विशेष्यदलम् । मानसत्वं जातिविशेषः । नियतत्वादिति । अत्र समवेतभोगकारणत्वे सत्यसमवेतभोगकारणत्वं नियतत्वशब्दार्थः । द्वितीयार्थो निरूपितत्वम् । तस्य च समवेतद्वयेऽन्वयः । पञ्चम्यर्थः प्रयुक्तत्वं तस्य च अनन्तत्वेऽन्वयः । तथा च तत्तदात्मसमवेतभोगजनकस्वविशिष्टतत्तदात्मासमवेतभोगजनकत्वप्रयुक्तानन्तत्ववन्मन इति वाक्यार्थः ।

द्रव्याणि निरूप्य गुणान्निरूपयन् क्रमप्राप्तं रूपं निरूपयति

**चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरं शुक्लं जले । शुक्लं भास्वरं च तेजसि ।**

चक्षुर्मात्रेति । इतरेन्द्रियाग्राह्यत्वं मात्रपदार्थः । चक्षुपश्चेतरत्वे ग्रहे चान्वयः । अथवा चित्रगुरित्यादौ गोपदस्येवग्राह्यपदस्यैव चक्षुरितरेन्द्रियाग्राह्यत्वविशिष्टचक्षुर्ग्राह्यत्वाविशिष्टे लक्षणा ।अवशिष्टपदे तात्पर्यग्राहके । उभयत्र ग्राह्यत्वं लौकिकविषयताश्रयत्वम् । तेन गुरुत्वादीनां चक्षुषा लौकिकग्रहेऽपि नातिव्याप्तिः । नवा रूपस्येतरेन्द्रियेणालौकिकग्रहेऽप्यसम्भवः । जन्यत्वंचेतरानिरूपितमसाधारणं ग्राह्यम् । तथाच चक्षुरितरेन्द्रियजन्यग्रहीयलौकिकविषयताशालित्वे सति गुणत्वं समुदितलक्षणार्थः । अत्र संयोगादिवारणाय प्रथमसत्यन्तम् । गुरुत्वादिवारणाय द्वितीयम् । रूपत्वादिवारणाय

Indira Gandhi National Centre for the Arts

गुणत्वम् । गुणपदं विशेषगुणपरम् । तेन प्रभाभित्तिसंयोगादौ नातिव्याप्तिः । वस्तुतस्त्वग्राह्यचक्षुर्ग्राह्यगुणविभाजकधर्मवत्त्वं लक्षणम् । तेन न परमाणुरूपेऽव्याप्तिः । अभास्वरं शुक्ल मिति । क्वचिन्नीलादिग्रहस्त्वौपाधिक इतिभावः । शुक्लं भास्वरमिति । सुवर्णादौ शुक्लभास्वररूपमभिभूतमितिभावः ।

रसं निरूपयति—

रसनग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः । पृथिवीजलवृत्तिः । पृथिव्यां षड्विधः । जले मधुर एव ।

रसनेति । रसनग्राह्यगुणविभाजकधर्मवत्त्वमर्थः । प्रयोजनं पूर्ववत् । मधुर एवेति । जम्बीररसादावम्लत्वग्रहस्त्वौपाधिक इति भावः ।

गन्धं निरूपयति—

घ्राणग्राह्यो गुणो गन्धः । स द्विविधः । सुरभिरसुरभिश्च । पृथ्वीमात्रवृत्तिः ।

घ्राणेति । अर्थः पूर्ववत् ।

स्पर्शं निरूपयति—

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स च त्रिविधः । शीतोष्णानुष्णशीतभेदात् । पृथिव्यप्तेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः । रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्रापाकजं नि-

Indira Gandhi National Centre for the Arts

त्यमनित्यं च । नित्यगतं नित्यमनित्यगतमनित्यम् ।

त्त्रागिति । अत्रापि चक्षुरग्राह्यत्वग्ग्राह्यगुणविभाजकधर्मवत्त्वं पर्यवसितं बोध्यम् । संयोगत्वादिकमादायातिव्याप्तिवारणाय अग्राह्यत्वान्तम् । गुरुत्वादिकमादाय तद्दोषवारणाय ग्राह्यत्वान्तम् । शीतो जल इत्यादि । तप्तजलादावुष्णत्वस्य उष्णजलादावनुष्णाशीतत्वस्य वन्हिजलगतवाय्वोरुष्णशीतत्वस्य प्रत्ययस्यौपाधिकत्वादितिभावः । अन्यत्र पाकजमिति । रूपादीतिशेषः ।

संख्यां निरूपयति ।

एकत्वादिव्यवहारहेतुः संख्या । नवद्रव्यवृत्तिः । एकत्वादिपरार्द्धपर्यन्ता । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यमनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्रानित्यमेव ।

एकत्वादीति । आदिना द्वित्वादिपरिग्रहः । व्यवहारश्च एकत्वादिर्गुण इति शेषः । तथाचैकत्वादिव्यवहारजनकतावच्छेदकमुख्यविशेष्यतावत्त्वमर्थः । द्वित्वादिकंत्विति । सर्वत्रानित्यमिति । तस्यापेक्षाबुद्धिजन्यत्वादितिभावः । तथाहि 'प्रथमे क्षणेऽयमेकोऽयमेक ' इत्येकत्वद्वयावगाहिन्यपेक्षाबुद्धिः । द्वितीये द्वित्वोत्पत्तिः । तृतीये द्वित्वनिर्विकल्पकम् । चतुर्थे तत्सविकल्पापेक्षाबुद्धिनाशौ । 'अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति ' इति नियमात् । पञ्चमे द्वित्वनाशः एवं त्रित्वादावपि बोध्यम् ।

परिमाणं निरूपयति ।

मानव्यवहारासाधारणं कारणं परिमाणम् । सर्वद्रव्यवृत्ति । तच्चतुर्विधम् । अणुमहद्दीर्घं ह्रस्वंचेति ।

Indira Gandhi National Centre for the Arts

मनोऽति । व्यवहारश्च 'अणुत्वादिर्गुण' इति । लक्षणपरिष्कारः संख्याया इव ज्ञेयः । परिमाणं नित्यगतं नित्यम् । अनित्यगतमनित्यम् । तत्र द्व्यणुकत्रसरेण्वोः सङ्ख्याजम् । तूलकादौ प्रचयजन्यम् । अन्यत्परिमाणजन्यं बोध्यम् ।

पृथक्त्वं निरूपयति--

## पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।

पृथगिति । अत्रासाधारणकारणत्वं तादृशव्यवहारजनकतावच्छेदकमुख्यप्रकारतावत्त्वम् । तेन पृथक्त्ववति अवधित्वे च नातिप्रसङ्गः । संयोगादिलक्षणेऽप्येवं बोध्यम् । तत्रैकपृथक्त्वं द्विविधम् । आश्रययोर्नित्यानित्यभेदात् । द्विपृथक्त्वादिकं तु द्वित्वादिवत्सर्वमनित्यम् । पृथक्त्वं तु अन्योऽन्याभावविलक्षणम् । विलक्षणप्रतीतेः ।

संयोगं निरूपयति—

## संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।

संयुक्तेति । अत्रजनकत्वं जनकतावच्छेदकमुख्यविशेष्यतानिरूपितप्रकारतावत्त्वं बोध्यम् । संयोगः सर्वोऽप्यव्यावृत्तिरनित्यश्च अजसंयोगानङ्गीकारात् ।

विभागं निरूपयति—

## संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।

संयोगनाशक इति । नाशजनकत्वं च प्रतियोगित्वसम्बन्धानवच्छिन्नकार्यतानिरूपितं ग्राह्यम् । तेन संयोगे नातिव्याप्तिः । आश्रयादिवारणाय गुणेति । विभागस्य संयोगनाशकत्वं कथमितिचेदित्थम् । प्रथममिषौ क्रिया ततो धनुषा सह विभागः । ततः

Indira Gandhi National Centre for the Arts

पूर्वसंयोगनाशः । तत उत्तरसंयोगोत्पत्तिः । ततः कर्मनाश इति । विभागः सर्वोऽप्यव्याप्यवृत्तिरनित्यश्च ।

परापरत्वे युगपन्निरूपयति—

**परापरव्यवहारासाधारणकारणे परत्वापरत्वे । ते च द्विविधे दिक्कृते कालकृते च । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतमपरत्वम् ।**

परापरेति । परव्यवहारजनकतावच्छेदकतादृशप्रकारताश्रयत्वं परत्वलक्षणम् । एवमपरत्वस्यापि बोध्यम् । परव्यवहारो द्विविधः । अयं ज्येष्ठोऽयं दूर इति । अपरव्यवहारो द्विविधः । अयं कनिष्ठोऽयं समीप इति । तयोर्दिक्कालभेदेन भेदमाह । ते द्विविध इति। दिक्कृते कालकृते इति । दिक्कृतं तु ज्ञायमानदिग्जन्यम् । तथाहि 'वैराजाद्द्रेणासङ्गमापेक्षया कन्हाटकं स्वसमवायिसंयुक्तसंयोगेन बहुतरदेशसंयोगवत्' इति ज्ञाने दैशिकपरत्वमुत्पद्यते । तत्र च सम्बन्धघटकतया दिशः प्रवेशात्तज्जन्यत्वं बोध्यम् । एवमपरत्वस्यापि निरुक्तसम्बन्धेनाल्पतरसंयोगज्ञानविषयदिग्जन्यत्वात्तत्त्वं बोध्यम् । अथवा परापरत्वयोराश्रये दिक्संयोगस्यासमवायित्वात्तत्प्रयोज्यत्वरूपं तत्त्वं बोध्यम् । कालकृतत्वं च निरुक्तसम्बन्धेन बहुतरविक्रियाप्रकारकज्ञानविषयककालजन्यत्वात्तत्सम्बन्धघटककालजन्यत्वरूपं स्वसंयोगजन्यत्वरूपं वा बोध्यम् । तान्युदाहरणमुखेनाह । ज्येष्ठ इति । एतानि च बुद्धिजन्यत्वात्सर्वाण्यनित्यानीति बोध्यम् ।

गुरुत्वं निरूपयति ।

**आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्ति ।**

आद्येति । पतनं नाम वृक्षविभागजनकव्यापारमारभ्य भूमिसंयोगजनकव्यापारपर्यंतं सर्वाः क्रियाः । तत्र प्राथमिकव्यापारो गुरुत्वजन्यः । द्वितीयादिस्तु वेगजन्यइति । वेगवारणाय आद्येति

द्रवत्वंनिरूपयति–

आद्यस्यन्दनासमवायिकारणं द्रवत्वं पृथिवीजलतेजोवृत्ति । तद्विविधं सांसिद्धिकं नैमित्तिकं च । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजन्यं द्रवत्वम् । तेजसि सुवर्णादौ ।

स्यन्दनं प्रस्रवणं तच्च सन्निकृष्टदेशस्य द्रवद्रव्यसंयोगानुकूलो व्यापारः । तत्र द्वितीयादिव्यापारजनकवेगवारणाय आद्येति । सांसिद्धिकमिति । अग्न्यादिसंयोगाजन्यमित्यर्थः । हिमकरकयोरौपाधिकद्रवत्वविरोधात्सूर्यकिरणभूमिसंयोगादिनोपाधिनिवृत्तिमात्रम् । न तु द्रवत्वोत्पत्तिरिति । सांसिद्धिकं पूर्ववद्द्विविधम् । नैमित्तिकं त्वनित्यमेव ।

स्नेहं निरूपयति––

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहो जलमात्रवृत्तिः ।

चूर्णादीति । पिण्डीभावः फूत्कारादिना देशान्तरगमनप्रतिबन्धकोऽवयवानां संयोगविशेषः । तद्धेतुत्वं चूर्णस्यापीति तद्वारणाय गुणेति । दुग्धादौ तु तदन्तर्गतजलभागस्यैव स्नेह उपलभ्यते । सच पूर्ववद्द्विविधः ।

Indira Gandhi National Centre for the Arts

शब्दं निरूपयति—

श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः। ध्वन्यात्मको वर्णात्मकश्च। ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

श्रोत्रेति। श्रोत्रग्राह्यगुणविभाजकधर्मवत्त्वमर्थः। तेन आद्यंतशब्दादौ नाव्याप्तिः। प्रयोजनं पूर्ववत्। आकाशमात्रेति। मात्रपदं वेदान्तिशङ्कानिरासार्थम्। भेर्यादाविति। अवच्छेदकतयेत्यादिः। शब्दः सर्वोऽप्यव्याप्यवृत्तिरनित्यश्च।

बुद्धिं निरूपयति—

सर्वव्यहारहेतुर्ज्ञानं बुद्धिः। सा द्विविधा। स्मृतिरनुभवश्च।

सर्वेति। व्यवहारश्च बुबोधयिषापूर्वकवाक्यप्रयोगः। तथा च तादृशव्यवहारजनकतावच्छेदकजातिमत्त्वमर्थः। तेन निर्विकल्पादौ नातिव्याप्तिः। बुबोधयिषापूर्वकवाक्यप्रयोगे वाक्यार्थज्ञानत्वेन कारणत्वात्कारणतावच्छेदकज्ञानत्वमादाय सर्वत्र लक्षणसमन्वयः। बुद्धिरिति लक्ष्यनिर्देशः। ज्ञानमिति। ज्ञानपदार्थस्य गुणान्तरत्वनिरासाय।

स्मृतिं लक्षयति—

संस्कारमात्रजन्यं ज्ञानं स्मृतिः।

संस्कारेति। ध्वंसवारणाय ज्ञानत्वनिवेशः। अनुभववारणाय सत्यन्तम्।

Indira Gandhi National Centre for the Arts

अनुभवं निरूपयति—

**तद्भिन्नं ज्ञानमनुभवः । स द्विविधो यथार्थोऽयथार्थश्च ।**

तद्भिन्नमिति । तत्स्मृतिभिन्नत्वे सतीत्यर्थः । स्मृतिवारणाय सत्यन्तम् । द्रव्यादिवारणाय ज्ञानेति ।

यथार्थानुभवं निरूपयति—

**तद्वति तत्प्रकारकानुभवो यथार्थः । यथायंघट इति । सैव प्रमेत्युच्यते ।**

तद्वतीति । अत्र प्रकारांशे एव यथार्थत्वस्य निर्वक्तव्यतया तत्पदं प्रकारपरम् । सप्तम्यर्थो विशेष्यित्वं वा । तत्र च तद्वतो निष्ठत्वेन निरूपितत्वेन वा अन्वयः । तत्प्रकारकमित्यस्य तन्निष्ठप्रकारतानिरूपितप्रकारितावानर्थः । तदेकदेशप्रकारतायां प्रकारितायां वा निरूपितत्वेन अवच्छिन्नत्वेन वा सप्तम्यर्थस्यान्वयः । प्रकारता च तद्वत्तावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या । तेन संयोगेन कपाले घटज्ञानस्य समवायेन तद्वद्विशेष्यकत्वस्य तत्प्रकारकत्वस्य च सत्त्वेऽपि न याथार्थ्यप्रसङ्गः । तथाच तेन सम्बन्धेन तत्तत्प्रकारकानुभवस्य याथार्थ्यम् । तेन सम्बन्धेन तद्वन्निष्ठविशेष्यतानिरूपिततत्सम्बन्धावछिन्नतान्निष्ठप्रकारतानिरूपितप्रकारताशालित्वेसत्यनुभवत्वम् । तादृशविशेष्यतानिरूपितविशेष्यित्वावच्छिन्न तादृशप्रकारताशाल्यनुभवत्वं वा । अयथार्थानुभववारणाय सत्यन्तम् । अत एव तद्वतीत्यपि । अत एव च विशेष्ये तद्वत्त्वनिवेशः । स्मृतीच्छादिवारणाय अनुभवत्वनिवेशः । सप्तम्यन्तार्थस्य ज्ञानान्वय इति तु न शंक्यम् । तथा सति तद्वन्निष्ठविशेष्यताकत्वे सति तत्प्रकारकानुभवत्वं लक्षणं स्यात्तथाच रङ्गत्वरजतत्वाभ्यां रजतरङ्गभ्रमेऽतिव्याप्तिः । सैवेति । शास्त्रे इत्यादिः । लोके तु तद्वति तत्प्रकारकज्ञानमात्रमुच्यते इति भावः ।

अयथार्थानुभवं लक्षयति--

तदभाववति तत्प्रकारकश्चायथार्थः । यथाशुक्ताविदं रजतमिति ।

तदभावेति । अत्र यत्सम्बन्धावच्छिन्नतन्निष्ठप्रतियोगिता गृह्यते तत्सम्बन्धावच्छिन्नप्रकारताऽपि ग्राह्या । वाक्यार्थरु.त्प्रयोजनानि च पूर्ववत् ।

यथार्थानुभवश्चतुर्विधः । प्रत्यक्षानुमित्युपमितिशाब्दभेदात् । तत्करणमपि चतुर्विधम् । प्रत्यक्षानुमानोपमानशब्दभेदात् । व्यापारवदसाधारणं कारणं करणम् ।

प्रत्यक्षेति । प्रमाणसामान्यलक्षणं दर्शयंस्तानि विभजते । तत्करणमिति । प्रत्यक्षेति । तत्करणज्ञानमन्तरेण प्रमाकरणज्ञानासंभवादुपोद्घातसंगत्या करणलक्षणमाह । व्यापारवदिति । अत्र व्यापारवत्त्वं जनकतासम्बन्धेन बोध्यम् । व्यापारवत्त्वं च जनकत्वमात्रम् । ईश्वरस्तज्ज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टान्यष्टौ साधारणकारणानि । तत्त्वं तु कार्यत्वावच्छिन्नकार्यतानिरूपितकारणत्वम् । असाधारणकारणत्वं च कार्यत्वानवच्छिन्नकार्यताघटितम् । इत्थं च जनकतासम्बन्धेन स्वजनकवत्वे सति स्वासाधारणकारणत्वम् । व्यापारवारणाय सत्यंतम् । कुलालपितुरीश्वरादेश्च वारणाय विशेष्यदलम् ।

उपोद्घातसंगत्या कारणत्वमाह—

अनन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वम् ।

Indira Gandhi National Centre for the Arts

अनन्यथेति । नियतान्यथासिद्धभिन्नत्वमित्यर्थः । तेन न बहुतरभेदनिवेशाद्गौरवम् । न वा विशेष्यदलवैयर्थ्यम् । नियतपूर्ववृत्तित्वं च कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्याधिकरणदेशनिरूपिताधेयतावदभावप्रतियोगितानवच्छेदकधर्मवत्वम् । घटं प्रति दण्डत्वादेर्वारणाय सत्यन्तम्। रासभादिवारणायविशेष्यदलम्।

कार्यलक्षणमाह

कार्यं प्रागभावप्रतियोगि ।

प्रसंगात्कारणं विभजते ।

कारणं त्रिविधम् । समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य । पटश्च स्वगतरूपादेः। कार्येन कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य । तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य । तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।

कारणमिति । समवायिकारणलक्षणमाह । यदिति । यस्मिन्समवेतमितिविग्रहः । तथा च समवायेन कार्याधिकरणत्वं पर्यवसितार्थः । असमवायिकारणस्वरूपमाह । कार्येणेति । कार्येण सह एकस्मिन्नर्थे समवेतत्वे साति कारणेन सहैकस्मिन्नर्थे समवेतत्वे सतीति योजना । कारणपदं समवायिकारणपरम् । प्रथमे तु तन्तुसंयोगस्य पटात्मककार्येण सहैकस्मिंस्तंतौ सत्त्वम् । द्वितीये तंतुरूपस्य पटरूपस्य समवायिकारणपटेन सह तंतौ सत्वम् । इदं च असमवायिकारणत्वसमानाधिकरणधर्मद्वयप्रदर्शनम् । लक्षणं तु

Indira Gandhi National Centre for the Arts

समवायस्वसमवायिसमवायान्यतरसम्बन्धावच्छिन्नप्रतियोगिताककार्याधिकरणवृत्त्यभावघटितनियतपूर्ववृत्तित्वघटितेति भावः । निमित्तकारणं लक्षयति । तदुभयाभिन्नानीति । करणमुपसंहरति तदेतदिति । यदसाधारणमित्यस्य व्यापारवदित्यादिः ।

प्रासङ्गिकं समाप्य प्रत्यक्षप्रमाणलक्षणमाह—

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । तद्द्विविधं निर्विकल्पकं सविकल्पकं च ।**

तत्रेति । प्रमाणेषु मध्येइत्यर्थः । प्रत्यक्षेति । जनकतया प्रत्यक्षत्वावच्छिन्नजनकत्वे सति प्रत्यक्षत्वावच्छिन्नजनकमित्यर्थः । सन्निकर्षवारणाय सत्यन्तम् । उभयत्र प्रत्यक्षत्वावच्छिन्नत्वनिवेशात्कालविधया प्रत्यक्षजनकध्वंसप्रतियोगिनि सन्निकर्षे न व्यभिचारः । नापीश्वरादौ । जन्यप्रत्यक्षसामान्यलक्षणमाह । इंद्रियेति । ध्वंसादिवारणाय ज्ञानेति ।

निर्विकल्पकं लक्षयति—

**तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । किंचिदिदमिति वस्तुमात्रावगाहि ज्ञानम् ।**

निष्प्रकारकमिति । प्रकारतादिशून्यमित्यर्थः । एवं संसर्गिताशून्यत्वं विशेष्यिताशून्यत्वं च बोध्यम् ।

सविकल्पकं लक्षयति ।

**सप्रकारकं ज्ञानं सविकल्पकं यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयं पाचकोऽयमिति ।**

सप्रकारकमिति । प्रकारतादिवदित्यर्थः । एवं संसर्गिता

Indira Gandhi National Centre for the Arts

वत्वं विशेष्यिवत्वत्ता बोध्यम्। यथेति। डित्थपदब्राम्हणत्वजाति श्यामरूपपाककृतीनां क्रमेण प्रकारत्वं बोध्यम्।

सन्निकर्षान्विभजते-

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थः सन्निकर्षः षड्विधः। संयोगः। संयुक्तसमवायः। संयुक्तसमवेतसमवायः। समवायः। समवेतसमवायः। विशेषणविशेष्यभावश्चेति।

षड्विध इति। विशेषणताचेति पाठः।

कार्यमुखेनसन्निकर्षाणां स्वरूपमाह—

चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः। घटरूपप्रत्यक्षे संयुक्तसमवायः। चक्षुःसंयुक्ते घटे रूपस्य समवायात। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः। चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात। श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वात्। शब्दस्याकाशगुणत्वात्। गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।

Indira Gandhi National Centre for the Arts

चक्षुषेत्यादि । अभावप्रत्यक्षजनने विशेषणतासन्निकर्ष इति पाठः । अत एवाग्रे विशेषणतैवोदाहृता ।

प्रत्यक्षज्ञानमुपसंहरति—

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम् । तत्करणमिंद्रियम् ।

एवमिति ।

प्रत्यक्षप्रमाणमुपसंहरति—

तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

तस्मादिति ।

इति प्रत्यक्षखण्डः ।

---

अनुमानं निरूपयितुं प्रतिजानीते—

अथ अनुमितिकरणमनुमानम् ।

अथेति । अनुमानं लक्षयति । अनुमितीति । जनकतया अनुमितित्वावच्छिन्नजनकत्वे सति अनुमितित्वावच्छिन्ननिरूपित-जनकमित्यर्थः प्रयोजनं पूर्ववत् ।

अनुमितिं लक्षयति—

परामर्शजन्यं ज्ञानमनुमितिः ।

परामर्शेति

Indira Gandhi National Centre for the Arts

उपोद्घातसंगत्या परामर्शं लक्षयति—

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा वन्हिव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वन्हिमानिति ज्ञानमनुमितिः ॥

व्याप्ति विशिष्टेति । वैशिष्ट्यं विषयितया । पक्षधर्मः पक्षसम्बन्धी । तस्यभावः पक्षधर्मता । पक्षसम्बन्ध इति यावत् । तस्या ज्ञानम् । व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयः । पक्षधर्मताविषयिताविशिष्टं व्याप्तिविषयिताभाने तन्निरूपितविषयतयोरपि परम्परया निरूप्यनिरूपकभावः सम्बन्धो भासत इति व्याप्तिविषयतानिरूपिते सम्बन्धविषयतानिरूपित पक्षतावच्छेदकावाच्छिन्नविषयतानिरूपकज्ञानं लभ्यते । ज्ञान पदं निश्चयपरम् । व्याप्तिविषयतानिरूपितविषयता च व्याप्ति घटकपदार्थविषयतानिरूपिता बोध्या । तेन भ्रमप्रमासाधारण्य निर्वाहः । तथा च तादृशविषायिताशालिनिश्चयत्वावाच्छिन्न निरूपितकार्यत्वमनुमितिलक्षणं पर्यवसितम् । अनुमितिलक्षणवाक्ये ज्ञानपदं स्वरूपकथनार्थम् ।

व्याप्तिस्वरूपमाह—

यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।

यत्रेति । अत्र इति पदं तादृशवाक्यपरम् । तत्तात्पर्यग्राहकं यत्रेत्यादि । इतिपदार्थस्यच बोध्यतासम्बन्धेन साहचर्य नियमेऽन्वयः । साहचर्यं साध्यनिष्ठहेतुसामानाधिकरण्यम् । तन्नियमः तन्मात्रसत्त्वम् । तद्विरोध्यसत्त्वमिति यावत् । विरोधी च हेतुसमानाधिकरणाभावप्रतियोगित्वम् । यादृशवन्हेर्यादृश

Indira Gandhi National Centre for the Arts

धूमसाहचर्यं तस्मिन्नतद्व्यापकत्वमिति विरोधः। अनुगतैकव्यक्तौ त्वेकाधिकरणावच्छेदेनासत्वम्। तथाच साध्यनिष्ठहेतुव्यापकत्वं स्वाश्रयसामानाधिकरण्यसम्बन्धेन हेतुसम्बद्धं व्याप्तिपदार्थः। व्यापकताश्रयसामानिधिकरण्यमिति पर्यवसितोऽर्थः। एतस्य यत्रेत्यादिवाक्यबोध्यता च वन्हिपदस्य धूमव्यापकवन्हौ निरूढ लाक्षणिकतया धूमव्यापकवन्हौ धूमे च यत्पदार्थभूतैकाधिकरणवृत्तित्वग्रहे तुल्यवित्तिवेद्यतया धूमे धूमव्यापकवन्हिसमानाधिकरण्यबोधात्। अथवा साहचर्यस्य हेतुनिष्ठसाध्यसामानाधिकरण्यस्य नियमः। तद्विरोधिनः साध्याभावतद्वृत्तित्वस्याभावः। एतस्य यत्रेत्यादिवाक्यबोध्यता च वन्हौ धूमाधिकरणवृत्यभावाप्रतियोगित्वग्रहे तुल्यवित्तिवेद्यतया धूमे वन्हिप्रतियोगिकाभाववदवृत्तित्वग्रहात्।

पक्षधर्मतास्वरूपमाह—

## व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।

व्याप्यस्येति धूमादेरित्यर्थः। पर्वतादिवृत्तित्वं पर्वतादिसम्बन्धः।

अनुमानं विभजते—

## अनुमानं द्विविधम्। स्वार्थं परार्थंच।

अनुमानमिति। स्वार्थानुमितित्वपरार्थानुमितित्वे अनुमितित्वव्याप्यजाती। तद्धर्मावच्छिन्नकरणे अनुमाने क्रमेण स्वार्थपरार्थानुमाने।

स्वार्थानुमानस्वरूपमाह—

## स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयो

Indira Gandhi National Centre for the Arts

भूयो दर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन्व्याप्तिं स्मरति। यत्र यत्र धूमस्तत्राग्निरिति। तदनन्तरं वन्हिव्याप्यधूमवानयं पर्वत इति ज्ञानमनुमितिरुत्पद्यते। अयमेव लिंगपरामर्श इत्युच्यते। तस्मात् पर्वतो वन्हिमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्।

स्वार्थानुमितिरिति। स्वार्थानुमितित्वाच्छिन्नहेतुरित्यर्थः। स्वार्थानुमितिस्वरूपमुपसंहरति। तदेतदिति। स्वार्थानुमिति। स्वार्थानुमितिरित्यर्थः।

परार्थानुमानस्वरूपमाह—

यत्तु स्वयं धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्।

यत्त्विति। तत्परार्थेति। तादिति लुप्तपञ्चमीकमव्ययम्। प्रयोज्यत्वं पञ्चम्यर्थः। पञ्चावयववाक्यप्रयोज्यमित्यर्थः। प्रयोज्यत्वं स्वजन्यमहावाक्यार्थबोधजन्यत्वम्। विजातीयानुमितिजनकतावच्छेदकं विजातीयपरामर्शत्वमानसत्वव्याप्यम्। तदवच्छिन्नजनकतावच्छेदकमपि तथा। तदवच्छिन्नं प्रति महावाक्यार्थबुद्धित्वेन कारणत्वात्पञ्चावयववाक्यजन्यमाहावाक्यार्थवोधजन्यत्वरूपं पञ्चावयववाक्यप्रयोज्यत्वं परार्थानुमानस्य। अथवा यदिति लुप्तचतुर्थीकमव्ययम्। यदर्थमित्यर्थः। यत्पदार्थः व्याप्तिज्ञानम्। तत्पदं व्याप्तिज्ञानपरम्। यदर्थं पञ्चावयववाक्यं प्रयुंक्ते तत्परार्थानुमानमित्यर्थः।

Indira Gandhi National
Centre for the Arts

SANS
181.43
ANN



IGNCA RAR
ACC. No. R-643

पञ्चावयववाक्यान्याह—

यथा पर्वतो वन्हिमान् । धूमवत्वात् । यो यो धूमवान् सोऽग्निमान् । यथा महानसम् । तथाचायं तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते ।

यथेति । पर्वत इति । अत्र वन्हिमतोऽभेदेन पर्वतेऽन्वयाद्वन्हिमदभिन्नः पर्वत इति बोधः । धूमेति । पञ्चम्यर्थो ज्ञानजन्य-ज्ञानविषयत्वम् । प्रथमज्ञाने धूमस्य अन्वयाद्धूमज्ञानजन्यज्ञानविषयत्वमितिबोधः । यो य इति। अत्र द्विरुक्तयच्छब्दतच्छब्द-समभिव्याहृत धूमव्यापकवन्हिरित्यर्थः । यत्तत्पदे तात्पर्यग्राहके। धूमवत्पदार्थस्य महानसपदार्थेऽन्वयः । धूमवदन्वितमहानसपदार्थे वन्हिमत्पदार्थस्य अभेदेनान्वयः । तादृशान्वयतात्पर्यग्राहकमेव यथेति । तथा च धूमवन्महानसं धूमव्यापकवन्हिमदित्यन्वय-बोधः । धूमवति वन्हिभाने वन्हिमद्वृत्तित्वस्य धूमे भानाद्धूम-व्यापकवन्हिमदित्यन्वयबोधः । धूमवति वन्हिभाने वन्हि-मद्वृत्तित्वस्य धूमे भानाद्धूमव्यापकवन्हिसमानाधिकरणो धूम इति पर्यवसितो बोधः। तथेति । धूमवानित्यर्थः। इदंपदार्थः सन्निकृष्ट-पर्वतः । तथाच धूमवान्पर्वत इति बोधः । तस्मादिति । व्याप्ति-पक्षधर्मताविशिष्टधूमस्तत्पदार्थः । तथा च व्याप्तिपक्षधर्मताविशिष्टो धूमज्ञानज्ञाप्यवन्हिमान्पर्वत इति बोधः ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वन्हिमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान्स स वन्हिमानित्युदाहर-णम् । तथाचायमित्युपनयः । तस्मात्तथेति

Indira Gandhi National
Centre for the Arts

निगमनम् । स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव कारणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।

पुनरनुमानं विभजते ।

लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति ।

लिङ्गमिति । अन्वयव्यतिरेकीति । अन्वयोऽन्वयव्याप्तिः । व्यतिरेको व्यतिरेकव्याप्तिः । तदुभयवदित्यर्थः । केवलान्वयीति केवलपदेन साध्यव्यतिरेकव्यवच्छेदः । व्यतिरेकश्चाभावमात्रम् । अन्वयित्वं चाविवक्षितम् । तथाच व्यतिरेकाप्रतियोगिसाध्यकत्वं केवलान्वयित्वमित्यर्थः । केवलव्यतिरेकीति । अत्र वक्ष्यमाणस्वरूपग्रन्थपर्यालोचनया अन्वयव्याप्तिग्रहाविषयत्वे सति व्यतिरेकिव्याप्तिग्रहविषयत्वम् । तदा तस्य केवलव्यतिरेकित्वम् ।

क्रमेण स्वरूपमाह

अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि यथा वन्हौ साध्ये धूमवत्त्वम् । यत्र यत्र धूमस्तत्र तत्राग्निरित्यन्वयव्याप्तिः । महानसादिर्दृष्टान्तः । अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा घटोऽभिधेयः प्रमेयत्वात्पटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्तीति । सर्वस्याप्यभिधेयत्वात्प्रमेयत्वाच्च । व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकी । यथा पृथिवीत-

Indira Gandhi National Centre for the Arts

रेभ्योभिद्यते । गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद्गन्धवत् । तथा जलम् । नचेयं तथा तस्मान्न तथेति । अत्र यद्गन्धवत्तदितरभेदवदित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् । व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि ।

अन्वयेनेति । अन्वयः साध्यम् । व्यतिरेकः साध्याभावः । निरूपितत्वं तृतीयार्थः । साध्यनिरूपिता हेतुनिष्ठा साध्याभावनिरूपिता च हेत्वभावनिष्ठा व्यापकत्वरूपा । तद्वत्त्वं च हेतोः स्वाश्रयप्रतियोगित्वसम्बन्धेन । यत्र धूम इत्यादिः । एतस्य व्याप्तिबोधकत्वं पूर्वमेवोक्तम् । यत्र वन्हिर्नास्तीत्यादेरपि धूमपदसमभिव्याहृतनञो वन्ह्यभावव्यापकाभावपरत्वाद्बोध्यम् । व्यतिरेकव्याप्तिर्नास्तीति।व्यतिरेकस्यैवाप्रसिद्धत्वादिति भावः।तदेवाह। सर्वस्येति न तथेति । इति पञ्चावयवप्रतिपाद्यं लिङ्गम् । अन्वयदृष्टान्तो नास्तीति । निश्चितसाध्यसाधनवान्नास्तीत्यर्थः । तदेवाह ॥ पृथिवीमात्रस्येति । सर्वपृथिव्यां साध्यसंशयात् । तथा च साध्यनिश्चयः कुत्रापि नास्तीति भावः । इत्थं च हेतावन्वयव्याप्तिग्रहो न सम्भवतीति पर्यवसितोऽर्थः ।

प्रसङ्गात्पक्षादीनां लक्षणमाह ।

सन्दिग्धसाध्यवान्पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः । निश्चितसाध्यवान्सपक्षः । यथा तत्रैव महानसम् । निश्चितसाध्याभाववान्विपक्षः यथा तत्रैव महान्हृदः ।

सन्दिग्धेति । सन्देहप्रकारीभूतं साध्यं यत्रेति विग्रहे सन्देहप्रकारीभूतसाध्यवानित्यर्थः । सन्देहसाध्यपारतंत्र्येणधर्मिण्येवान्वे-

Indira Gandhi National Centre for the Arts

तीति । विशेष्यतासम्बन्धेन साध्यप्रकारकसन्देहवत्त्वं लक्षणं पर्यवसितम् । निश्चतेति । विशेष्यतया साध्यप्रकारकनिश्चयवत्वं पूर्ववदर्थः । निश्चितसाध्याभावेति । पूर्ववत् ।

प्रसङ्गाद्दुष्टहेतून्निरूपयति ।

**सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।**

सव्यभिचारेति । सामान्यलक्षणं तु यद्विषयत्वेन ज्ञानस्य अनुमितिविरोधित्वं तत्त्वम् । व्यभिचाराद्यन्यतमवत्त्वं वा । तेनानुपसंहार्यादौ नाव्याप्तिः । सव्यभिचारः हेतुनिष्ठसाध्याभावव-दवृत्तित्वादिरूपव्यभिचारसहितः । विरुद्धेति । हेतुनिष्ठसाध्य व्यापकीभूताभावप्रतियोगित्वरूपविरोधसहितः । सत्प्रतिपक्षः । सन्साध्याभावव्याप्तिपक्षधर्मताविशिष्टः प्रतिपक्षः प्रतिहेतुर्य-स्येति विग्रहे साध्याभावसाधकहेत्वन्तरविशिष्टः । असिद्धः । हेत्वभाववत्पक्षादिरूपासिद्धिविशिष्टः । बाधितः । साध्या-भाववत्पक्षादिरूपबाधविशिष्टः । सव्यभिचारशब्दपर्यायमाह ।

**सव्यभिचारोऽनैकान्तिकः । स त्रिविधः । साधारणासाधारणानुपसंहारिभेदात ।**

अनैकान्तिक इति एकान्ते साध्यवत्येव वर्तत इत्यैका-न्तिकः न एकान्तिक इति विग्रहे सव्यभिचारपदसमानार्थकत्वम् । साधारणाद्यन्यतमत्वं सव्यभिचारत्वम् । तं विभजते । त्रिविध इति ।

**तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा पर्वतो वन्हिमान्प्रमेयत्वादिति प्रमेयत्वस्य वन्ह्यभाववति ह्रदे विद्यमानत्वात । सर्वसपक्षवि-**

Indira Gandhi National Centre for the Arts

पक्षव्यावृत्तोऽसाधारणः । यथाशद्बोः नित्यः शब्दत्वात् । शब्दत्वं सर्वेभ्यो नित्येभ्योअनित्येभ्योव्यावृत्तं शब्दमात्रवृत्ति । अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वमनित्यं प्रमेयत्वात् । अत्र सर्वस्यापि पक्षात्वाद्दृष्टान्तो नास्ति ।

साधारणः साध्यतदभाववति वर्तमानः तत्र साध्यवद्वृत्तित्वस्यानुपयोगादवशिष्टभागमादाय स्वरूपमाह । साध्याभावेति । एतज्ज्ञानं साध्याभाववद्वृत्तित्वरूपव्याप्तिग्रहप्रतिबन्धकम् । असाधारणस्वरूपमाह । सर्वेति । अत्र सपक्षव्यावृत्तिग्रहवतः पुरुषस्य साध्यसामानाधिकरण्यग्रहप्रतिबन्धः फलम् । अनुपसंहारिणमाह । अन्वयेति । अत्र द्विविधसहचारग्रहेण द्विविधव्याप्त्यज्ञानं फलम् ।

विरुद्धं लक्षयति -

साध्याभावव्याप्यो हेतुर्विरुद्धः । यथा शब्दो नित्यः कार्यत्वादिति । कार्यत्वं नित्यत्वाभावेनानित्वेन व्याप्तम् ।

साध्याभावेति । व्याप्तः व्यतिरेकव्याप्तिमान् । साच साध्यव्यापकीभूताभावप्रतियोगित्वम् । हेतौ तज्ज्ञानं च पक्षे हेतुज्ञान सहितं साध्यानुमितौ प्रतिबन्धकम् ।

सत्प्रतिपक्षमाह —

यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः । यथा शद्बो नित्यः श्रावणत्वात् । शब्दत्ववत् । शब्दोऽनित्यः कार्यत्वात् घटवत् ।

Indira Gandhi National Centre for the Arts

यस्येति एतज्ज्ञानमपि पूर्ववत् साध्याभावव्याप्यवत्ताज्ञानमुद्रया साध्यानुमितिप्रतिबन्धकम् । साध्यं नित्यत्वम् ।

असिद्धं विभजते ।

असिद्धस्त्रिविधः । आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति । तत्राश्रयासिद्धो यथा । गगनारविंदं सुरभ्यरविन्दत्वात । अत्र गगनारविन्दमाश्रयः स च नास्त्येव। स्वरूपासिद्धो यथा । शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात ।

आश्रयेति । आश्रयासिद्धः आश्रयासिद्धिमान् । आश्रयस्य पक्षस्यासिद्धिः पक्षे पक्षतावच्छेदकस्याभावस्तद्वान् । स्वरूपस्य हेतोरसिद्धिः पक्षे विरहस्तद्वान्। व्याप्यत्वासिद्धः व्याप्यत्वस्यासिद्धिर्यस्मादिति व्युत्पत्योपाधिरेव व्याप्यत्वासिद्धिः । उपाधिना व्यभिचारानुमितौ व्याप्तेरसिद्धेः । तद्वान् । क्रमेणोदाहरणान्याह गगनेति स च नास्त्येवेति । अरविन्दस्य गगनीयत्वं नास्तीत्यर्थः । तेन न सिद्ध्यसिद्धिभ्यां व्याघातः । एवमन्यत्रापि बोध्यम् ।

व्याप्यत्वासिद्धिं लक्षयति—

सोपाधिको व्याप्यात्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । यथा पर्वतो धूमवान्वह्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः ।

Indira Gandhi National Centre for the Arts

यत्र यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र यत्र वन्हिस्तत्रार्द्रेन्धनसंयोगो नास्ति । अयोगोलके आर्द्रेन्धनसंयोगाभावात् । इति साधनाव्यापकता । एवं च साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वन्हिमत्वं व्याप्यत्वासिद्धम् ।

सोपाधिक इति । व्यभिचारितासम्बन्धेनोपाधिविशिष्ट इत्यर्थः । उपाधिं लक्षयति । साध्येति । एतज्ज्ञानेन व्यभिचारानुमित्या व्याप्तिग्रहप्रतिबन्धः फलम् ।

बाधितं लक्षयति—

यस्य साध्याभावः प्रमाणान्तरेण निश्चितःस बाधितः । यथा वन्हिरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं तत्प्रत्यक्षेण गृह्यत इति बाधितम् ।

यस्येति । निश्चित इति पक्षे इत्यादिः । तथाच पक्षविशेष्यकप्रमानिश्चयप्रकारीभूतसाध्याभावरूपबाधवत्त्वं बाधितत्वमिति भावः । अथवा प्रमाणेन निश्चितत्वकथनाद्वस्तुतः पक्षनिष्ठ साध्यभाव इति लभ्यते । तथाच पक्षनिष्ठसाध्याभावादिरूपबाध वान्बाधित इति भावः । उदाहरणे प्रमाणान्तरग्राह्यत्वं दर्शयति । अत्रेति । इत्यनुमानम् ।

इत्यनुमानखंडः

---

Indira Gandhi National Centre for the Arts

अथोपमानं निरूपयंस्तल्लक्षयाति—

**उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः ।**

उपमितीति । जनकतया उपमितित्वावच्छिन्न जनकत्वेसति उपमितित्वावच्छिन्नजनकमित्यर्थः । शेषं पूर्ववत् । उपमितिलक्षणं तु सादृश्यविशिष्टे पदवाच्यत्वप्रकारकस्मृतित्वावच्छिन्नकारणतानिरूपितकार्यत्वम् । उपमितिस्वरूपमाह । संज्ञेति । संज्ञा गवयादिपदम् । संज्ञी गवयादिः । तयोः सम्बन्धो वाच्यवाचकभावः ।

उपमानस्वरूपमाह—

**तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । तथाहि कश्चिद्गवयशब्दार्थमजानन्कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन्गोसदृशपिण्डं पश्यति।तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते।**

तत्करणमिति । श्रुत्वेति । गोसादृश्यविशिष्टे गवयपदवाच्यत्वप्रकारकशाब्दबोधानंतरमित्यर्थः । श्रुधातोः श्रवणशब्दोभयवाचकत्वात् स्मरन्गोसदृशं पश्यतीति । अत्र दर्शनानन्तरजन्यं स्मरणं बोध्यम् । एवं वैधर्म्यज्ञानादप्युपमितिर्बोध्या ।

इत्युपमितिः ।

शब्दं निरूपयंस्तल्लक्षयाति—

**आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । यथा गामानयेति । शक्तंपदम् ।**

आप्तवाक्यमिति । आप्तोच्चरितमित्यर्थः । उपोद्धातेनाप्तं लक्षयति । आप्तस्त्विति । यथार्थवक्तेति प्रकृतवाक्यार्थविषयक यथार्थशाब्दबोधविषयकतात्पर्यवानित्यर्थः । तथाचैतादृशतात्पर्य जन्यवाक्यत्वं प्रमाणशब्दत्वं पर्यवसितम् । वाक्यं प्रति वाक्यार्थ-बुबोधयिषायाः कारणत्वात् । पदसमूह इति तथाच पदसमूहादेव शाब्दबोधोनैकस्मादिति भावः । शक्तमिति ॥ शक्तिमदित्यर्थः ।

शक्तिस्वरूपमाह—

**अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः । आकांक्षायोग्यतासन्निधिश्चवाक्यार्थज्ञा-नहेतुः ।**

अस्मादिति । जन्यत्वं पञ्चम्यर्थः । बोद्धव्य इति । बोधवि-षय इत्यर्थः । तथा च 'घटपदजन्यबोधविषयो घटो भवतु' इतीईश्व-रेच्छाशक्तिरिति पर्यवसितम् । ईश्वरीयत्वनिवेशादाधुनिकसंकेतित शब्दस्य न यज्ञादौ प्रयोगः ।

आकांक्षादिकमाह

**पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावक-त्वमाकाङ्क्षा । अर्थाबाधो योग्यता । पदाना-मविलम्बेनोच्चारणं सन्निधिः ।**

पदस्येति पदनिष्ठमित्यर्थः । अन्वयाननुभावकत्वमिति अन्वयबोधानुपधायकत्वमित्यर्थः । तथाच ' गामानय ' इत्यत्र गोपदनिष्ठ अं पदाभाव प्रयुक्तं शाब्दबोधानुपाधायकत्वं गोपदे अंपद निरूपिताकांक्षा । शाब्दबोधस्तु गोवृत्तिकर्मत्वमिति । योग्यता-माह । अर्थेति । अर्थस्य प्रकारस्याबाधः अभावाभावः । तथा-च अंपदार्थकर्मत्वरूपविशेष्ये गोपदार्थरूपप्रकारवत्वं निरुक्त-

Indira Gandhi National Centre for the Arts

शाब्दबोधे योग्यता इत्यर्थः । सन्निधिमाहपदानामिति । तथाच गोपदनिष्ठमम्पदाव्यवहितत्वं गोपदेऽम्पदसन्निधिरित्यर्थः एवं तात्पर्यस्यापि हेतुत्वं बोध्यम् । एतेषां ज्ञायमानानां कारणत्वं बोध्यम् ।

कारणतानियामकव्यातिरेकमाह

आकांक्षादिरहितं वाक्यमप्रमाणम् । यथा गौरश्वो पुरुषोहस्तीति न प्रमाणमाकांक्षाविरहात । अग्निना सिञ्चेदिति न प्रमाणं योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादि पदानि न प्रमाणं सान्निध्याभावात् ।

प्रसंगाद्वाक्यसामान्यं विभजते ।

वाक्यं द्विविधं वैदिकं लौकिकं च । वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणं लौकिकंत्वाप्तोक्तं प्रमाणमन्यदप्रमाणम् । वाक्यार्थज्ञानं शाब्दज्ञानम् ।

द्विविधमिति । वैदिकं वेदघटकं तद्भिन्नं लौकिकम् । शब्दस्वरूपमाह वाक्यार्थेति एकपदार्थेऽपरपदार्थसंसर्गविषयकं ज्ञानमित्यर्थः । शाब्दलक्षणं तु 'शक्तिलक्षणान्यतरसम्बन्धेन पदजन्यपदार्थस्मृतित्वावच्छिन्नकारणतानिरूपितकार्यत्वम्' । अत्रेयं शाब्दबोधप्रक्रिया । प्रथमं गवादिपदानां गवादौ सम्बन्धज्ञानं गवादि गवादिपदशक्यो लक्ष्यो वेति । ततः कालान्तरे 'गामानय त्वम्' इति केनचिदुक्ते गवादिपदेभ्यो गवादीनर्थान्स्मरति । आकांक्षादीज्ञानतस्तदनन्तरं गोकर्मकानयनानुकूलकृतिमांस्त्वमितिशाब्दबुद्धिर्जायते । लक्षणा च शक्यसम्बन्धः । यथा गङ्गापदस्य गङ्गासमीपे तीरे लक्षणा ।

Indira Gandhi National Centre for the Arts

शाब्दप्रमाणमुपसंहरति

**तत्करणं शब्दः ।**

तत्करणमिति ।

इति शाब्दः खण्डः

---

अयथार्थानुभवस्य प्राग्लक्षितत्वाद्विभागमाह--

**अयथार्थानुभवस्त्रिविधः । संशयविपर्ययतर्कभेदात् । एकस्मिन्धर्मिणि विरुद्धनानाकोटिकं ज्ञानं यथा स्थाणुर्वा पुरुषो वेति । मिथ्याज्ञानं विपर्ययः । यथा शुक्तौ रजतमिति ।**

अयथार्थानुभवस्य प्राग्लक्षितत्वात्तद्विभागमाह । अयथार्थेति संशयं लक्षयति । एकस्मिन्निति सप्तम्यर्थो विशेष्यत्वम् । विरुद्धेति । विरोधविशिष्टनानाधर्मप्रकारकम् । तथाच यत्किंचिद्धर्मिविशेष्यतानिरूपितविरुद्धनानानिष्ठप्रकारतानिरूपितप्रकारिताशालिज्ञानत्वं पर्यवसितम् । स्थाणुर्वेतिज्ञाने पुरोवर्तिनिष्ठ विशेष्यतानिरूपितस्थाणुत्वपुरुषत्वरूपविरुद्धनानानिष्ठप्रकारतानिरूपितप्रकारिताशालित्वाल्लक्षणसमन्वयः । विपर्ययं लक्षयति । मिथ्येति । मिथ्या तदभाववति तत्प्रकारकं ज्ञानंतर्कान्यानिश्चयः । तथाच तदभाववति तत्प्रकारकतर्कान्यनिश्चियानुभवत्वं विपर्ययलक्षणम्।

तर्कं लक्षयति ।

**व्याप्यारोपेण व्यापकारोपस्तर्कः । यदि वन्हिर्न स्यात्तर्हि धूमोऽपि न स्यादिति ।**

व्याप्येति । अत्र व्याप्यपदं व्याप्यत्वेन ज्ञायमानपरम् । तेनाव्याप्यारोपेण तर्के नाव्याप्तिः । आरोपपदं ज्ञानमात्रपरम् ।

Indira Gandhi National Centre for the Arts

तेनायोगोलके धूमाभावेन वन्ह्यभावतर्के नाव्याप्तिः । व्याप्यारोपे-त्यत्रारोपपदं बाधविषयकयथार्थनिश्चयपरम् । तेन ह्रदो वन्हिमानि-त्यनुमितौ नातिव्याप्तिः । बाधनिश्चये यथार्थत्वनिवेशादयोगोलकं धूमाभाववत्स्यादिति तर्के नातिव्याप्तिः । अयथार्थानुभवस्यैव लक्ष्य-त्वात् । इत्थं च व्याप्यत्वेन ज्ञानजन्यत्वे सति बाधविषयकयथार्थनिश्च-यजन्यत्वं पर्यवसितम् ।

प्राक्स्मृतेर्लक्षितत्वात्तां विभजते ।

**स्मृतिरपि द्विविधा । यथार्था अयथार्था च । प्रमा-जन्या यथार्था । अप्रमाजन्या अयथार्था ।**

स्मृतिरिति । प्रमाजन्येति । तच्च संस्कारद्वारा बोध्यम् । तथाच संस्कारसम्बन्धावच्छिन्नप्रमाभ्रमनिष्ठजनकतानिरूपितजन्यत्वे लक्षणे बोध्ये ।

बुद्धिं निरूप्य सुखादीन्निरूपयति ।

**सर्वेषामनुकूलतया वेदनीयं सुखम् । प्रतिकूलत-या वेदनीयं दुःखम् । इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।**

सर्वेषामित्यादि । अनुकूलतया वेदनीयमिति स्ववृत्तित्वेन इच्छाविषयः । लक्षणं तु इष्टसाधनताज्ञानधीनेच्छाविषयत्वम् । अनिष्टसाधनताज्ञानाधीनद्वेषविषयत्वं दुःखस्य लक्षणम् । प्रति-कूलतया वेदनीयमिति । द्वेषविषय इत्यर्थः । प्रवृत्तेः साक्षादनुकू-लत्वमिच्छालक्षणम् । निवृत्तेः साक्षादनुकूलत्वं द्वेषलक्षणम् । ज्ञान-वारणाय । साक्षादिति ॥ कृतिः प्रयत्न इति । कृतित्वजातिमत्वं प्रयत्नसामान्यलक्षणम् । स त्रिविधः । प्रवृत्तिनिवृत्तिजीवन योनियत्नभेदात् ।

Indira Gandhi National Centre for the Arts

विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः । बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना द्विविधाः। नित्या अनित्याश्च। नित्या ईश्वरस्य । अनित्या जीवस्य ।

विहितेति । इष्टसाधनत्वेन वेदबोधित इत्यर्थः। साक्षात्सुखसाधनत्वं पर्यवसितं लक्षणम् । तेन ज्योतिष्टोमादौ नातिप्रसङ्ग । निषिद्धेति अनिष्टसाधनत्वेन वेदबोधित इत्यर्थः । साक्षाद्दुःखसाधनत्वं पर्यवसितं लक्षणम् । तेन निषिद्धकर्मादौ नातिप्रसङ्गः ।

संस्कारस्त्रिविधः । वेगो भावनास्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावनात्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः । कटादिपृथिवीवृत्तिः ।

वेग इति । 'क्रियाजन्यत्वे सति क्रियाजनकत्वं' वेगलक्षणम् । गुरुत्वादिवारणाय सत्यन्तम् । विभागादिवारणाय विशेष्यदलम् । पृथिव्यप्तेजोवायुमनोमात्रवृत्तितावच्छेदकसंस्कारविभाजकोपाधिमत्त्वं वा वेगलक्षणम् । अनुभवजन्येति । अनुभववारणाय जन्यान्तम् । स्मृतिवारणाय विशेष्यदलम् । अन्यथाकृतस्येति पूर्वसंयोगाद्विजातीयसंयोगवत इत्यर्थः । पुनरिति । पूर्वसंयोगसजातीयसंयोगासमवायीत्यर्थः । तथाच 'पूर्वसंयोगविजातीयसंयोगनाशकत्वे सति पूर्वसंयोगसजातीयसंयोगजनकत्वं' पर्यवसन्नम् । क्रियावारणाय सत्यन्तम् । विभागवारणाय विशेष्यदलम् । संस्कारः सर्वोऽप्यनित्यः ।

Indira Gandhi National
Centre for the Arts

गुणान्निरूप्य कर्मणां लक्षणमाह

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरसन्निकृष्टसंयोगहेतुराकुंचनम् । विप्रकृष्टहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् ।

चलनात्मकमिति । संयोगविभागानुकूलमित्यर्थः ।

नित्यमनेकमेनकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । तद्विविधम् । परापरभेदात । परं सत्ता । अपरं द्रव्यत्वादि ।

नित्यमिति । 'ध्वंसाप्रतियोगित्वं नित्यत्वम्' । एकमनेकानुगतमिति । स्वरूपतोऽनेकानुगतमित्यर्थः । न तु सामान्यरूपेणेतिभावः । अनेकानुगतत्वं च 'समवायेनानेकवृत्तित्वम्' तथाच नित्यत्वे सति अनेकसमवेतत्वं तत्त्वं' पर्यवसितम् । तद्द्वैविध्यमाह परमित्यादिना ।

विशेषाणां स्वरूपमाह

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषा अनन्ता एव ।

नित्यद्रव्येति व्यावर्तकाः । आश्रयाणां परस्परं भेदानुमिति जनकाः । तथाहि 'अयं पृथिवीपरमाणुरितरपरमाणुभ्यो भिद्यत एतद्विशेषात्' इत्यनुमाने हेतुत्वं बोध्यम् । लक्षणं तु 'सामान्याभिन्नत्वे साति सामान्यशून्यत्वे सति समवेतत्वम्' । अथवा 'स्वतो व्यावृत्तत्वम्' । नित्य इति संयोगादिवारणाय नित्यत्वम् । गगनादिवारणाय 'सम्बन्ध' इति । सम्बन्धत्वं 'स्वरूपत्वानवच्छिन्नसांसर्गिकविषयताश्रयत्वम्' । तेन गगनादीनां स्वरूपत्वेन सम्बान्धित्वेऽपि न क्षतिः ।

Indira Gandhi National Centre for the Arts

नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथावयवावयविनौ। गुणगुणिनौ। क्रियाक्रियावन्तौ। जातिव्यक्ती। विशेषनित्यद्रव्ये चेति।

ययोरिति। अविनश्यदिति। विनाशपर्यंतमित्यर्थः। एकम्। अवयव्यादिकम्। अपरम्। अवयवादि। आश्रितमेवेति। अवयवादिकं परित्यज्यावयव्यादिकं नैव तिष्ठति। भूतलादिकं परित्यज्य घटादिकं तिष्ठतीति तौ नायुतसिद्धावितिभावः।

अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य। त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिकोऽत्यंताभावः। यथा भूतले घटो नास्तीति। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिकोऽन्योन्याभावः। यथाघटः पटो न भवतीति।

अनादिरिति। आदिरहितः। आदिरुत्पत्तिः। सान्तइति। अन्तोध्वंसः। प्रतियोगितासम्बन्धेन तद्वान्। तथाचोत्पत्तिशून्यत्वे सति ध्वंसप्रतियोगित्वं प्रागभावत्वम्। इदं च स्वरूपकथनं तेन नात्माश्रयः। उत्पत्तिमत्त्वे सति अभावत्वं लक्षणम्। अत्यन्ताभावादिवारणाय सत्यन्तम्। घटादिवारणाय विशेष्यदलम्। त्रैकालिकेति। भूतभविष्यद्वर्तमानरूपत्रिकालवृत्तिरित्यर्थः। संसर्गेति। तादात्म्यातिरिक्तेत्यर्थः। तथाचोक्तसंसर्गावच्छिन्नप्रतियोगिकाभावत्वमत्यन्ताभावलक्षणम्। नित्यत्वं स्वरूपकथनम्। परमाण्वादिवारणायाभावत्वस्य आवश्यकतया नित्यत्वस्य व्यर्थत्वात्। अथवा संसर्गेति। अन्योन्याभावभिन्नाभावत्वमित्यर्थः।

तेन घटान्योन्याभावस्य अन्योन्याभावस्वरूपत्वेन तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकत्वेऽपि नान्योन्याभावेऽतिव्याप्तिः। इत्थं च ध्वंसादिवारणाय 'त्रैकालिकेति'। 'घटो नास्ति' इत्यादिप्रतीतिसिद्ध इत्यर्थः। एवमग्रेऽपि। अत्रेदं तत्त्वम्। घटान्योन्याभावानां स्वात्यंताभावस्वरूपत्वेऽपि न तेषामत्यन्ताभावलक्षणलक्ष्यत्वं। न तेषां भेदा अत्यन्ताभावशरीरे निवेशनीयाः। अत एव तेषामन्योन्याभावलक्षणलक्ष्यत्वेनोपन्यासो यथा घटः पटो न भवतीति। घटात्यन्ताभावानां स्वावच्छिन्नभिन्नभेदादिस्वरूपत्वेऽपि न भेदास्तत्र निवेशनीयाः। अत एव तेषामत्यन्ताभावलक्षणलक्ष्यत्वेनोपन्यासो यथा भूतले घटो नास्त्यनेन। इत्थं च अत्यन्ताभावलक्षणप्रविष्टमन्योन्याभावभिन्नत्वं नान्योन्याभावसामान्यभेदोऽपि न लक्ष्यत्वेनाभिप्रेतानां घटादिभेदानां विशिष्यैवेति। इयमेव रीतिरन्योन्याभावलक्षणेऽप्यूह्या। तादात्म्येति। अत्यन्ताभावभिन्नाभाव इत्यर्थः। तेनात्यन्ताभाववच्छिन्नभेदस्यात्यन्ताभावत्वेऽपि नातिव्याप्तिः। अत्रापि नित्यत्वं निवेशनीयम्। तेन ध्वंसादौ नातिव्याप्तिः।

न्यायनये षोडशपदार्थोक्तेरपि न सप्तत्वहानिरित्याह—

**सर्वेषामेव पदार्थानां यथायथमुक्तेष्वेवान्तर्भावात्सप्तैव पदार्था इति सिद्धम्।**

सर्वेषामिति। प्रमाणादीनामित्यर्थः। तथाच कणादन्याय मतयोरविरोध इति भावः।

तदेवाह

**कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये॥**
**अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः॥ १॥**

कणादेति। इति श्रीमत्पदवाक्यप्रमाणपारीण मेरुशास्त्रिकृततर्कसंग्रहवाक्यवृत्तिः समाप्ता।

IGNCA RAR
ACC. No. R-643

Indira Gandhi National
Centre for the Arts

# विक्रीस तैयार.

| | कि. रु. आ. पै. |
|---|---|
| तर्कसंग्रह–मूलमात्र अन्नंभट्टकृत. .... .... | ०–१–० |
| तर्कसंग्रह–न्यायबोधिनी, पदकृत्यटीकासमेत | ०–५–० |
| तर्कसंग्रह–दीपिका नीलकंठीटीका समेत .... | ०–१२–० |
| तर्कसंग्रह–व्याख्यालघुबोधिनी समेत. .... | ०–६–० |
| तर्कसंग्रह–भाषाटीकासमेत .... .... | ०–८–० |
| तर्कसंग्रह–श्रीमेरुशास्त्रिप्रणीत वाक्यवृत्ति-सहित. .... .... .... | ०–५–० |
| तर्कसंग्रह–व्याख्यंत पट्टाभिरामकृत वाक्यार्थसहित. .... .... .... | ०–४–० |
| भाषापरिच्छेद कारिकावली-सिद्धान्तमुक्तावलीसमेतविश्वनाथपंचाननकृत. | ०–८–० |
| न्यायसिद्धान्तमुक्तावली—भाषाटीकासमेत साधुगोविंददास उदासीकृत. .... | २–०–० |
| कारिकावली–मुक्तावली दिनकरी रामरुद्री. | ३–०–० |
| भुवनेशलौकिकन्यायसाहस्री–पण्डित ठाकुरदत्त विरचित..... .... .... | २–०–० |
| सामान्यनिरुक्ति- गदाधरभट्टाचार्यकृत. .... | ३–०–० |
| न्यायप्रदीप- पं० गंगासहायजीकृत. .... | १–०–० |
| शतकोटि ... .... .... .... .... | ०–५–० |
| कार्याधिकरणवाद .... .... .... .... | ०–१०–० |
| अवच्छेदकत्वनिरुक्ति .... .... .... | ०–१२–० |
| सिद्धान्तचिन्तामणि .... .... .... | ०–१२–० |
| पदवाक्यरत्नाकर .... .... .... | २–०–० |
| भाट्टरहस्यम् .... .... .... .... | १–२–० |

पुस्तक मिलनेका ठिकाना
पंडित–ज्येष्ठाराम मुकुन्दजी.
कालबादेवी रोड, मुंबई.

Indira Gandhi National Centre for the Arts